# Shri Radhakrishna Suprabhatam

# શ્રીરાધાકૃષ્ણસુપ્રભાતમ્

## Document Information

Text title : rAdhAkRRiShNasuprabhAtam

File name : rAdhAkRRiShNasuprabhAtam.itx

Category : suprabhAta, devii, rAdhA, devI

Location : doc_devii

Transliterated by : NA

Proofread by : PSA Easwaran

Description/comments : Datta Gopala Krishna, Pammal, Chennai 9442252443

Source : kalyANamanjarI dvitIya bhAgaH rAdhAkalyaNam

Acknowledge-Permission: Svarna Prakashanam

Latest update : May 14, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 30, 2022

*sanskritdocuments.org*

# શ્રીરાધાકૃષ્ણસુપ્રભાતમ્

સત્યં ધર્મમપીહ રક્ષિતુમહો ભૂભારનાશાય વૈ
દૈત્યૈસ્તાપિતસર્વદૈવતગણાન્ સંરક્ષિતું લીલયા ।
લીલામાનુષવિગ્રહઃ સમભવદ્યો વા હરિર્ભૂતલે
રાધાકૃષ્ણમહાપ્રભુઃ સ ભગવાન્ રક્ષાં કરોત્વન્વહમ્ ॥ ૧॥

ગોપીરૂપધરાન્ મહામુનિગણાન્ ગોરૂપદેવાન્ સદા
રક્ષાર્યૈ સમનુગ્રહાય ચ મુદા કૃષ્ણં વપુઃ પ્રાપ યઃ
સોઽયં સાર્વજનીનવન્દ્યવિભવો વિશ્વૈકરક્ષાકરઃ
રાધાકૃષ્ણમહાપ્રભો સુરપતે તે સુપ્રભાતં શુભમ્ ॥ ૨॥

સૌન્દર્યં કિલ મૂર્તમેવ સકલં લોકૈકવિસ્માપકં
ચૌર્યં યસ્ય ચ ભક્તસઙ્ઘવિનુતં પાપાપહં પ્રત્યહમ્ ।
મુષ્ણન્ત્યદ્ય હિ કૃષ્ણચૌર્યસુકથાઃ ભક્તસ્ય દુઃખાનિ વૈ
રાધાવલ્લભ રાસકેલિરસિક શ્રીસુપ્રભાતં શુભમ્ ॥ ૩॥

વેદાન્તપ્રતિપાદ્યમાનવિભવો વેદૈકવેદ્યપ્રભુઃ
વંશીવાદનલોલુપઃ વ્રજજનાનન્દૈકધુર્યો વિભુઃ ।
વિખ્યાતો ભુવનેષુ બાલવપુષા વીણામુનીન્દ્રસ્તુતઃ
રાધાલોલ રમાપતે યદુપતે તે સુપ્રભાતં શુભમ્ ॥ ૪॥

રાધાવલ્લભ રઞ્જિતાખિલમનાઃ કન્દર્પદર્પાપહ
લીલાલોલુપ લબ્ધભક્તિસુલભ શ્રીદેવકીનન્દન ।
લીલામાનુષ લોલકુન્તલ મહાલાવણ્યરત્નાકર
રાધામાધવ રમ્યકેલિકુતુકિન્ તે સુપ્રભાતં શુભમ્ ॥ ૫॥

પૂજ્યાષ્ટાક્ષરમન્ત્રમન્ત્રિત નમો નારાયણાખ્ય પ્રભો
શ્રીમદ્દ્વાદશમન્ત્રનિત્યમહિત શ્રીવાસુદેવ પ્રભો ।
રાંપૂર્વૈશ્ચ ષડક્ષરૈઃ સુવિદિત શ્રીવીરરામ પ્રભો
રાધાકૃષ્ણ મહાપ્રભોઽખિલગુરો તે સુપ્રભાતં શુભમ્ ॥ ૬॥

ત્વં સાન્દીપનિસદ્ગુરોર્હિ વચસા સામુદ્રમગ્નં શિશું
આનીયાપિ ચ સદ્ગુરોર્હિ નિકટે પ્રત્યર્પયઃ સત્વરમ્ ।
તેન ત્વાં ગુરુરાટ્ પ્રપૂજયદહો પુત્રસ્ય લાભાત્ સ્વકાત્
ભો દેવ ત્વમચિન્ત્યવિક્રમગુણસ્તે સુપ્રભાતં શુભમ્ ॥ ૭॥

ભુક્ત્વા તત્પૃથુકં કુચેલગૃહિણીસમ્પ્રેષિતં સાદરં
વિદ્યાભ્યાસસહાયકસ્ય ચ ગૃહં શ્રીશ્રીસમૃદ્ધં વ્યધાઃ ।
આર્તત્રાણપરાયણઃ સ ભગવાન્ સર્વસ્વદાનોદ્યતઃ
રાધાકૃષ્ણ સુસુન્દરાર્તિહરણ શ્રીસુપ્રભાતં શુભમ્ ॥ ૮॥

આદિત્યાદિનવગ્રહાશ્ચ તિથયઃ હોરા ચ યોગાસ્તથા
નક્ષત્રાણિ ચ વાસ્તવઃ પ્રતિદિનં દિક્પાલભૂતાનિ વા ॥

રાધાકૃષ્ણનિવિષ્ટચેતસમમી નો પીડયન્તિ ધ્રુવં
રાધાકૃષ્ણમહાપ્રભો તવ શુભં સુપ્રાતમેવાદ્ય હિ ॥ ૯॥

દેવ ત્વાં શરણં ગતોઽસ્મિ સતતં રાધામનોલ્લાસક
ત્વં માતાસિ પિતા તથૈવ સહજો બન્ધુશ્ચ પુત્રી સુતઃ ।
સર્વસ્વં હિ મમ ત્વમેવ સતતં શ્રીગોપિકાપ્રેમભાક્
પાહ્યસ્માન્ સકુટુમ્બકાન્ તવ પદદ્વન્દ્વૈકસેવારતાન્ ॥ ૧૦॥

રાધાકૃષ્ણમહાપ્રભો ત્રિભુવનક્ષેમઙ્કરસ્યાશુ વૈ
શ્રીસુપ્રાતમિમં સમાધિતમના યો વા પઠેદન્વહમ્ ।
સો નિત્યં વિજયી સમાપ્તસુધનઃ સત્પુત્રપૌત્રૈર્વૃતઃ
દીર્ઘાયુશ્ચ નિરામયશ્ચ નિવસેત્ શ્રીકૃષ્ણકારુણ્યતઃ ॥ ૧૧॥

ઇતિ શ્રીરાધાકૃષ્ણસુપ્રભાતમ્ ॥

From kalyANamanjarI, dvitIya bhAgaH rAdhAkalyaNam
sangrahItaM rA. dattagopAlakRRiShNaH, svarNaprakAshanam

Proofread by PSA Easwaran

*Shri Radhakrishna Suprabhatam*

pdf was typeset on October 30, 2022

Please send corrections to *sanskrit@cheerful.com*